गर्जितः, पुं, (गर्ज्जो गर्ज्जनं जातोऽस्य । जातार्थे इतच् ।) मत्तहस्ती । इत्यमरः । २ । ८ । ३६ ॥

गर्त्तः, पुं, (गिरति ग्रसति स्वस्मिन् पतितं जीवजातादिकमित्यर्थः । गॄ निगरणे + “हसिमृग्रिण्वामिदमीति ।” उणां । ३ । ८६ । इति तन् ।) भुवि श्वभ्रम् । गाड़ा इति भाषा ॥ तत्पर्य्यायः । अवटः २ । इत्यमरः । १ । ८ । २ ॥ भूरन्ध्रम् ३ दरः ४ श्वभ्रम् ५ । इति जटाधरः ॥ आवटिः ६ आवटुः ७ पृथिवीरन्ध्रम् ८ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । २१ । ६ ।
“धरण्यां विवृते गर्त्ते निपपात लघुक्रमः ॥”)
त्रिगर्त्तदेशः । कुकुन्दरः । इति मेदिनी । ते । १३ ॥ रोगभेदः । इति शब्दरत्नावली ॥ (मातृगर्भरूपगह्वरम् । यथा, भागवते । ३ । ३१ । ५ ।
“शेते विण्मूत्रयोर्गर्त्ते स जन्तुर्जन्तुसम्भवे ॥”
कूपः । यथा, तत्रैव । ३ । १३ । ३४ ।
“यद्रोमगर्त्तेषु निलिल्युरध्वरा-
स्तस्मै नमः कारणसूकराय ते ॥”
नरकविशेषः । यथा, मार्कण्डेये । २१ । १० ।
“निपपात महागर्त्ते तिमिरौघसमावृते ॥”
षट्धनुःसहस्रेभ्यो न्यूनगतिर्देवखातभेदः ।
एतल्लक्षणं यथा, छन्दोगपरिशिष्टे ।
“धनुः सहस्राण्यष्टौ च गतिर्यासां न विद्यते ।
न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिताः ॥”
अस्योदाहरणं यथा, मनौ । ४ । २०३ ।
“नदीषु देवखातेषु तड़ागेषु सरःसु च ।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥”
गीर्य्यते स्तूयते वेदस्तुतिं कुर्व्वता जनेनेति । गॄ + तन् गुणश्च । देवरथः । यथा, ऋग्वेदे । ५ । ६२ । ८ ।
“आरोहथो वरुण ! मित्र ! गर्त्तमतश्चाचाथे अदितिं दितिं च ॥” “गर्त्तं रथम ॥” इति भाष्यम् ॥)

गर्त्तिका, स्त्री, (गर्त्तोऽस्त्यस्याः इति ठन् ।) तन्तुशाला । इति हेमचन्द्रः । ३ । ६५ ॥ तांत्‌घर इति भाषा ॥

गर्द्द, कि रवे । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे-भ्वां-परं-अकं-सेट् ।) कि, गर्द्दयति गर्द्दति । रवः शब्दः । इति दुर्गादासः ॥

गर्द्दभं, क्ली, (गर्द्द्यते शब्द्यते विश्रूयते गन्धादिभिरिति यावत् । गर्द्द रवे । “कॄशॄशलिकलिगर्द्दिभ्योऽभच् ।” उणां । ३ । १२२ । इति अभच् ।) श्वेतकुमुदम् । इति हेमचन्द्रः ॥ (यथा, वैद्यकरत्नमालायाम् ।
“कैरवं चन्द्रकान्तञ्च गर्द्दभं कुमुदं कुमुत् ॥”)
विड़ङ्गम् । इति रत्नमाला ॥

गर्द्दभः, पुं, (गर्द्दति गर्द्दयति वा कर्कशशब्दं करोतीत्यर्थः । गर्द्द कि रवे + “कॄशॄशलिकलीति ।” उणां । ३ । १२२ । इति अभच् ।) पशुविशेषः । गाधा इति भाषा । (यथा, मनौ । ८ । २९८ ।
“गर्द्दभाजाविकानान्तु दण्डः स्यात् पञ्च
माषिकः ॥”)
तत्पर्य्यायः । चक्रीवान् २ वालेयः ३ रासभः ४ खरः ५ । इत्यमरः । २ । ९ । ७७ ॥ राशभः ६ । इति तट्टीका ॥ शङ्कुकर्णः ७ भारगः ८ भूरिगमः ९ धूसराह्वयः १० वेशवः ११ धूसरः १२ । इति जटाधरः ॥ स्मरस्तम्भः १३ चिरमेही १४ पशुचरिः १५ चारपुङ्खः १६ चारटः १७ ग्राम्याश्वः १८ । इति शब्दरत्नावली ॥ * ॥ अस्य मांसस्य गुणः । किञ्चित् गुरुत्वं बलप्रदत्वञ्च । मूत्रस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । क्षारत्वम् । कफमहावातभूतकम्पोन्मादहरत्वञ्च । इति राजनिर्घण्टः ॥ (तथा च ।
“गार्द्दभं वा घनं मूत्रं तैलयोग्यं कचिद्भवेत् ।
सक्षारं तिक्तकटुकमुन्मादकुष्ठरोगजित् ॥”
इति हारीते प्रथमे स्थाने नवमेऽध्याये ॥
“गरचेतोविकारघ्नं तीक्ष्णं ग्रहणिरोगनुत् ।
दीपनं गार्द्दभं मूत्रं कृमिवातकफापहम् ॥”
इति सुश्रुते सूत्रस्थाने ५४ अध्याये ॥)
तस्मात् गुणशिक्षा यथा,—
“अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति ।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्द्दभात् ॥”
इति चाणक्यम् । ७० ॥

गर्द्दभगदः, पुं, (गद्यते पीड्यतेऽनेन । गद + करणे अच् । गदो रोगः । गर्द्दभनामको गदः शाकपार्थिववत् समासः ।) ज्वालागर्द्दभकरोगः । इति राजनिर्घण्टः ॥ अस्य लक्षणं जालगर्द्दभशब्दे द्रष्टव्यम् ॥

गर्द्दभशाकः, पुं, (गर्द्दभाख्यः शाकः । यद्वा, गर्द्दभप्रियः शाको यस्य ।) ब्रह्मयष्टिवृक्षः । इति जटाधरः ॥

गर्द्दभशाका, स्त्री, (गर्द्दभशाक + टाप् ।) ब्रह्मयष्टिः । वामनहाटी इति भाषा ॥ इति रत्नमाला ॥

गर्द्दभशाखी, स्त्री, (गर्द्दभाख्या शाखा यस्याः । यद्वा गर्द्दभप्रिया शाखा अस्याः जातौ संज्ञायां वा ङीष् ।) भार्गी । इति राजनिर्घण्टः ॥

गर्द्दभाण्डः, पुं, (गर्द्दभं गन्धविशेषं अमति गच्छति प्राप्नोतीत्यर्थः । अम गत्याम् + “अमन्ताड्डः ।” उणां । १ । ११३ । इति डप्रत्ययः ।) वृक्षविशेषः । गान्धिभाट इति ख्यातः । अयं पत्रकाण्डफलादिभिरश्वत्थाकारः । गन्धपिप्पलः । इति केचित् । इति भरतः ॥ गर्द्दपिप्पली । इति ख्यातः । इति सारसुन्दरी ॥ तत्पर्य्यायः । कन्दरालः २ कपीतनः ३ सुपार्श्वकः ४ प्लक्षः ५ । इत्यमरः । २ । ४ । ४२ ॥ शुङ्गी ६ प्लवः ७ कमण्डलुः ८ । इति जटाधरः ॥ गर्द्दभाण्डः ९ प्लक्षेशः १० कन्दरालकः ११ । इति शब्दरत्नावली ॥ प्लक्षवृक्षः । इति राजनिर्घण्टः ॥ पाकुड़ इति भाषा ॥(कपीतनाश्वत्थशब्दयोरस्य विवृतिर्ज्ञेया ॥)

गर्द्दभाह्वयः, पुं, (गर्द्दभेन गन्धेन आह्वयति स्पर्द्धते इति । आ + ह्वे + अच् । यद्वा गर्द्दभः आह्वयः आख्या यस्य ।) कुमुदम् । इति हेमचन्द्रः । ४ । २३० ॥

गर्द्दभिका, स्त्री, (गर्द्दभः दुर्गन्धमयपिड़काभेदो विद्यतेऽस्यामिति ठन् टाप् च ।) क्षुद्ररोगविशेषः । तल्लक्षणं यथा,—
“मण्डलं वृत्तमुत्सन्नं सरक्तं पिड़काचितम् ।
रुजाकरीं गर्द्दभिकां तां विद्यात् वातपित्तजाम् ॥”
तच्चिकित्सा यथा,—
“विवृतामिन्द्रवृद्धाञ्च गर्द्दभीं जालगर्द्दभम् ।
पैत्तिकस्य विसर्पस्य क्रियया साधयेद्भिषक् ॥
पाके तु शोधयेदाज्यैः पक्वैर्म्मधुरभेषजैः ॥”
इति भावप्रकाशः ॥

गर्द्दभी, स्त्री, (गर्द्दभस्य पत्नीति स्त्रियां जातौ गौरादित्वाद्वा ङीष् ।) गर्द्दभपत्नी ।
(“सहैव दशभिः पुत्त्रैर्भारं वहति गर्द्दभी ॥”)
तस्याः क्षीरस्य गुणाः । बलकारित्वम् । वातश्वासहरत्वम् । मधुराम्लरसत्वम् । रूक्षत्वम् । दीपनत्वम् । पथ्यत्वञ्च । तद्दधिगुणाः । रूक्षत्वम् । उष्णत्वम् । लघुत्वम् । दीपनत्वम् । पाचनत्वम् । मधुराम्लरसत्वम् । रुच्यत्वम् । वातदोषनाशित्वञ्च । तन्नवनीतगुणाः । कषायत्वम् । कफवातनाशित्वम् । बल्यत्वम् । दीपनत्वम् । पाके लघुत्वम् । उष्णत्वम् । मूत्रदोषकारित्वञ्च । इति राजनिर्घण्टः ॥ क्षुद्रजन्तुविशेषः । गर्द्दभिकारोगः । इति मेदिनी । ने । १६ ॥ (अस्य लक्षणं यथा,—
“सा विद्धा वातपित्ताभ्यां ताभ्यामेव च गर्द्दभी ।
मण्डला विपुलोत्सन्ना सरागपिटिकाचिता ॥”
इति वाभटे उत्तरस्थाने एकत्रिंशेऽध्याये ॥)
अपराजिता । श्वेतकण्टकारी । कटभी । इति राजनिर्घण्टः ॥ (क्षुद्रकीटभेदः । यथाह सुश्रुतः ।
“पञ्चकीटो दुन्दुभिको मकरः शतपादकः ।
पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्द्दभी ॥”)

गर्द्ध, क लिप्से । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, गर्द्धयति । इति दुर्गादासः ॥

गर्द्धः, पुं, (गर्द्ध्यते इति । गर्द्ध + भावे घञ् ।) स्पृहा । इति हेमचन्द्रः । ३ । ९४ ॥ गर्द्दभाण्डवृक्षः । इति शब्दचन्द्रिका ॥

गर्द्धनः, त्रि, (गृध्यति स्पृहयतीति । गृध् + “जुचङ्क्रम्यदन्द्रम्यसृगृधीति ।” ३ । २ । १५० । इति युच् ।) लुब्धः । इत्यमरः । ३ । ९ । २२ ॥

ग(र्व्व)र्ब्ब, तृ क ङ दर्पे । इति कविकल्पद्रुमः ॥ (अदन्त चुरां-आत्मं-अकं-सेट् ।) दर्पोऽहङ्कारः । ङ, गर्व्वयते गर्व्वापयते धनेनीचः । इति दुर्गादासः ॥

ग(र्व्व)र्ब्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) गर्व्वति । इति दुर्गादासः ॥

ग(र्व्व)र्ब्बः, पुं, (गर्व्व + भावे अप् । यद्वा, गिरति मदमिति । गॄ निगरणे + “कगॄशॄदृभ्यो वः ।” उणां । १ । १५५ । इति वः ।) अहङ्कारः । दर्पार्थादन्तगर्व्वधातोर्भावेऽल्प्रत्ययः ॥ इति मुग्धबोधम् ॥ (यथा, रामायणे । २ । ३१ । २० ।
“यदि दुःस्थो न रक्षेत भरतो राज्यमुत्तमम् ।
प्राप्य दुर्मनसा वीर ! गर्व्वे(र्व्वे)ण च विशेषतः ॥”)